International Journal of Sanskrit Research 2022; 8(4): 118-123

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(4): 118-123
© 2022 IJSR
www.anantaajournal.com
Received: 09-04-2022
Accepted: 14-06-2022

**Dr. Nilakantha Karuan**
Researcher, Pondicherry University, Chinna Kalapet, Kalapet, Puducherry

**KE Dharaneedharan**
Professor, Pondicherry University, Chinna Kalapet, Kalapet, Puducherry

**Corresponding Author:**
**Dr. Nilakantha Karuan**
Researcher, Pondicherry University, Chinna Kalapet, Kalapet, Puducherry

# जानकीहरणमहाकाव्ये अलङ्कारविमर्शः

**Dr. Nilakantha Karuan and KE Dharaneedharan**

## प्रस्तावना

'अलं 'पूर्वक 'कृ' धातोः घञ् प्रत्यये कृते निष्पन्नो भवति अलङ्कारशब्दः । लैटिन् भाषायाम् अलङ्कारशब्दस्यार्थः 'स्वर्णम्' विद्यते । 'अलङ्करोति इति अलङ्कार' 'आभूषितं करोतीति अलङ्कारः'। आभूषणकरणमेव अलङ्कारः । करणार्थे अलङ्क्रियते अनेनेति विग्रहेण अनुप्रासोपमादयश्च अलङ्कारः इत्यर्थः । भावार्थे तु अलङ्काराणामलङ्कार इति विग्रहेण सौन्दर्यमित्यर्थः । प्रथमः भावार्थे विस्तृतः, द्वियीयस्तु संकुचितः । प्रधानतया विस्तृतार्थे एव पदमिदं ग्राह्यमिति जगाद प्रमुखालङ्कारिकः वामनाचार्यः तथाहि –"काव्यं ग्राह्यमलङ्कारात् सौन्दर्यालङ्कार" [1] अर्थात् अलङ्कारो नाम सौन्दर्यम् । सौन्दर्यं वर्तते इति कारणात् काव्यं ग्राह्यमित्यर्थः । यथा कटककुण्डलहारादिभिः आभूषणैः कामिन्याः सौन्दर्यवृद्धिः भवति तथैव अनुप्रासोपमादिभिः अलङ्कारैः कविताकामिन्याः शोभावर्द्धनं क्रियते । पुनः अलङ्कारशब्दोऽयं करणव्युत्पत्या उपमादिषु वर्तते इति उपमादयोऽपि अलङ्कारा एवेतिकुन्तकः उक्तवान् । भामहादयोऽपि अलङ्करापदमिदं विस्तृतार्थे च जगुहुरिति वक्तुं शक्यते । तथाहि भामहः स्वीयग्रन्थं 'काव्यालङ्कार' इति व्यपदिदेश । रुद्रटोऽपि काव्यालङ्कार इत्येव नाम चकार । तथैव वाग्भटोऽपि वामनोऽपि काव्यालङ्कारसूत्राणि इति नाम चकार । एतेषु कोऽपि केवलालङ्कारप्रतिपादकः न वर्तते । अतः काव्यसौन्दर्याधायकविविषयाणां सम्पूर्णतत्त्वानां विवेचनशास्त्रमेव अलङ्कारशास्त्रमिति वक्तुं शक्यते ।

काव्यादर्शानुसारमलङ्कारस्य लक्षणम् –

"काव्यशोभाकारान् धर्मानलङ्कारान् प्रचक्षते ।
ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्नेन वक्ष्यति"॥ [2]

चन्द्रालोकानुसारम् अलङ्कारस्य लक्षणम् –

"शब्दार्थयोः प्रसिद्ध्या वा कवेः प्रौढिवशेन वा ।
हारादिवदलङ्कारः सन्निवेशो मनोहरः"॥ [3]

प्रथमम् अलंकाराणां शास्त्रीयविवेचनं भरतमुनिना नाट्यशास्त्रे प्रतिपादितम् । ते उपमा, रूपकं, दीपकं, यमकं चेति । नाट्यशास्त्रे भरतमुनिः उक्तवान् -

"उपमा रूपकञ्चैव दीपकं यमकं तथा ।
अलंकारास्तु विज्ञेयाश्चत्वारे नाटकाश्रयाः"॥ [4]

भरतमुनेः अनन्तरम् अलंकाराणां पर्यायेण विकासोऽभवत् तथा अप्पय्यदीक्षितस्य समयपर्यन्तं पञ्चविंशत्युत्तरैकशतं (125) अलंकाराः अभूवन् ।
यद्यपि अलंकारतत्त्व समीक्षां सर्वप्रथमं भरतमुनिः कृतवान् तथापि तस्य प्रथमाचार्यः भामहः आसीत्, य अलंकाराणां स्वरूपविवेचनं कृत्वा अलंकारान् काव्यात्मरूपेण प्रतिपादितवान् । तस्य मते अलंकाराः काव्यस्य प्रमुखसौन्दर्याधायकाः भवन्ति । यथा कस्यापि कामिन्याः मुखं चारूत्वे सत्यपि आभूषणं विना न शोभते ।
काव्यालंकारे भामहेनोक्तम् -

"न कान्तमपि निर्भूषं विभाति वनितानन्" [5]

आचार्यः दण्डी काव्ये विद्यमानान् सर्वान् अपि काव्यशोभाकरधर्मान् अलंकारशब्देन प्रतिपादयति -

"काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते" [6]

वामानाचार्यः यद्यपि काव्यात्मरूपेण रीतिमङ्गीकृतवान् तथापि काव्यस्य शोभा अलङ्कारेणैव भवतीति प्रतिपादितवान् । यद्यपि काव्यस्य शोभा गुणैः भवति तथापि तस्य शोभातिशयः अलङ्कारणैव सम्भवति ।
काव्यालङ्कारे –

"काव्यशोभायाःकर्तारो धर्मा गुणाः"। [7]
"तदतिशयहेतवस्त्वलंकाराः"। [8]

उद्भटाचार्येण काव्ये अलंकाराणां प्राधान्यमङ्गीकृतम् । तेन रसादयः रसवत्, प्रेयः, समाहितादिषु आलंकारेषु योजिताः । रूद्रटाचार्योऽपि काव्ये अलंकाराणां प्राधान्यं प्रतिपादितवान् । तन्निरूपयितुं स्वालंकारग्रन्थस्य नाम "काव्यालंकारम्" इति दत्तवान् । तद्यथा –

"काव्यालंकारोऽयं ग्रन्थः क्रियते यथायुक्ति" [9]

वक्रोक्तिसम्प्रदायस्य प्रवर्तकेन कुन्तकाचार्येणापि काव्ये अलंकाराणां प्राधान्यं दत्तम् । काव्यपरिभाषां कुर्वन् सः अलंकारतोक्ति काव्यमिति लक्षणं कृतवान् । उक्तं यथा वक्रोक्तिजीविते–

"अलंकृतिरलंकार्यमपोधृत्य विवेच्यते ।
तदुपायतया तत्त्वं सालंकारस्य काव्यता"॥ [10]

राजानकरूय्यकोपि स्वकीयालंकारशास्त्रे सर्वत्र अलंकाराणां लक्षणोदाहरणं सयुक्तिकं प्रतिपादितवान्। भोजराजः काव्यशोभाकरधर्मान् अलंकारस्य सामान्यलक्षणरूपेणअङ्गीकृत्य तस्य वर्गत्रयं प्रतिपादितवान्। ते यथा – वक्रोक्तिः, स्वभावोक्तिः रसोक्तिश्चेत् ।
उपमादीनाम् अलंकाराणां प्राधान्ये वक्रोक्तिः, गुणप्राधान्ये स्वभावोक्तिः, रसप्राधान्ये रसोक्तिरिति भोजराजस्याभिप्रायः ।
आनन्दवर्धनाचार्यः अलंकारस्य स्थानं काव्ये अङ्गरूपेण कृतवान् । तस्य मते रसाणान् अङ्गरूपेण अलंकाराः सम्भवन्ति । द्वितीयोद्योते आनन्दवर्धनाचार्येण उक्तम् -

"विवक्षा तत्परत्वेन नाङ्गित्वेन कदाचना" [11]

परवर्तिनि काले शनैः शनै अलंकाराणां स्थानं केवलं काव्यशोभापरकत्वेन जातम् । तदर्थं मम्मटाचार्यः काव्यप्रकाशे काव्यलक्षणनिरूपणावसरे "अलंकृती पुनः क्वापि" इति लक्षयन् अलङ्काराणां प्राधान्यं नाङ्गीकृतवान् । तन्मते अलङ्काराः काव्ये स्पुटरूपेण न भवन्ति चेदपि न तत्र काव्यत्वहानिः ।
महाकविकुमारदासः वाल्मीकिकालिदासादि कवयः इव वैदर्भी रीतिमाश्रित्य काव्यं अलिखत्। तस्य अलङ्कारविधानं रसोपकारको भवति । सः अलङ्काराणां प्रयोगे सिद्ध आसीत् ।

- **शब्दालङ्कारः -**

शब्दगताः शब्दसौन्दर्यप्रदायकाः । एवं शब्दचमत्कारजनकत्वं शब्दालङ्काराणां वर्त्तते ।

- **अनुप्रासः -**

शब्दालङ्कारेषु अतिप्रसिद्धतया प्रथमालङ्कारोऽनुप्रासः । अनुप्रासालङ्कारस्य लक्षणस्य प्रसङ्गे विश्वनाथेनोक्तम् –

"अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्" [12]

स्वरस्य वैषम्येऽपि यत् शब्दसाम्यं सः अनुप्रासा इत्यन्वयः । स्वरस्य यत् वैषम्येऽपि साम्याऽभावेऽपि की कु के इत्यादि (स्वर) विजातीयत्वेऽपि शब्दसाम्यं व्यञ्जनवर्णानां साम्यं समानश्रुतिमत्वम् अनुप्रासः अनुप्रासालङ्कारः इत्यर्थः । यथा -

आसीदवन्यामतिभोगभाराद्दिवोऽवतीर्णा नगरीव दिव्या ।
क्षत्रानलस्थानशमी समृद्ध्या पुरामयोध्येति पुरी परार्ध्या ॥ [13]

श्लोकोऽयं एकाक्षरस्य आवृत्तेः उदाहरणम् । अतः अत्र अनुप्रासः अलङ्कारः दृश्यते ।

- **यमकम् –**

"सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते"॥[14]

अर्थे सति पृथगर्थायाः भिन्नार्थायाः स्वरव्यञ्जनसंहते स्वरव्यञ्जनसमुदायस्य तेनैव क्रमेण पूर्वोपात्तक्रमेणैव आवृत्तिरावर्तनं यमकं कथ्यते इत्यर्थः । यथा –

निनदता नदताडितमेखलं विगलताऽगलतावृतसानुना ।
असुभुजा सुभुजाऽसुरसंहतिः प्रविदिता विदिता दिशि भूभूता ॥[15]

अत्र नदता – नदता, गलता-गलता, सुभुजा –सुभुजा, विदिता विदिता क्रमेण आवृत्तिः अभवत्। अतः अत्र यमकमलङ्कारः भवति ।

- **श्लेषालङ्कारः –**

"श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते" [16]

यत्र एकरूपैः शब्दैः अनेके अर्थाः अभिधीयन्ते तत्र श्लेषालङ्कारः भवति । वर्ण-प्रत्यय-लिङ्ग-लिङ्ग-प्रकृति-पद-विभक्त-वचन-भाषाणां श्लिलष्टत्वेन श्लेषालङ्कारः भवति, अयं च अष्टधा भवति ।

बलिप्रतापापहविक्रमेण त्रैलोक्यदुर्लङ्घ्यसुर्दनेन ।
नानन्तभोगाश्रयिणाऽपि तेने तेनालसत्वं पुरुषोत्तमेन ॥[17]

अत्र बलिः, सुदर्शनः,अनन्तभोगाश्रयिणादि श्लिष्टपदानि विष्णुदशरथयोः विषये प्रोक्तानि भवन्ति। अतः अत्र श्लेषालङ्कारः भवति ।

- **चित्रालङ्कार**

चित्रालङ्काराणां प्रयोगे माध्यमेन कवयः तेषां पाण्डित्यं प्रकाशयति । भारविः तथा माघादि महाकवयः चित्रालङ्काराणां प्रयोगे सिद्ध आसीत् । महाकविकुमारदासः जानकीहरणमहाकाव्ये चित्रालङ्कारस्य प्रयोगः कृतवान् । महाकविकुमारदासः शब्दालङ्काराणां प्रयोगः काव्यसौन्दर्यार्थमकरोत् । कुमारदासेन"जानकीहरणम्" इति महाकाव्ये चित्रालङ्कारचित्रबन्धयोः नैके श्लोकाः दृश्यन्ते ।

- **अर्थालङ्कारः**

अर्थचमत्कृतिमवलम्व्य च स्वीक्रियते अर्थालङ्कारता।

- **उपमा**

अर्थालङ्कारेषु उपमालङ्कारः सर्वप्रथमतया, प्राधान्येन च परिगण्यते ।

"साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः" [18]

एकस्मिन्नेव वाक्ये द्वयोः पदार्थयोरर्थात् उपमानोपमेययोः अवैधर्म्यं वैधर्म्यराहित्यं वाच्यम् इवादिप्रतिपादितं साम्यमुपमा इत्यर्थः ।

पाशपाणिरसाविष्टविग्रहो वनगोचरः ।
वीरोऽपि वरुणः केन क्षुद्रपाशीव पीडितः ॥[19]

- **रूपकम्**

"रूपकं रुपितारोपाद्वि (पो वि) षये निरपह्नवे"[20]

अर्थात् निरपह्नवे अर्थात् निषेधरहिते विषये उपमेये रूपितस्य उपमानस्य आरोपस्तत्त्वेन प्रतीतिरेव रुपकमित्यर्थः । यथा –

नरेन्द्रचन्द्रस्य यशोवितानज्योत्स्ना महीमण्डलमण्डनस्य ।
तस्यारिनारीनयनेन्दुकान्तनिष्यन्दहेतुर्भुवमाततान॥ [21]

अत्र नरेन्द्रे चन्द्रः, शसि ज्योत्स्ना तथा नयनस्य इन्दुकान्तमणेः चमत्कारपूर्णम् अभेदारोपस्य करणात् अत्र रूपकालङ्कारो भवति ।

- **उत्प्रेक्षालङ्कार**

"भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना" [22]

प्रकृतस्य अर्थात् उपमेयस्य परात्मना अर्थात् उपमानात्मना सम्भावना उत्प्रेक्षा इत्यर्थः । यथा –

आसीदवन्यामतिभोगभाराद्दिवोऽवतीर्णा नगरीव दिव्या ।
क्षत्रानलस्थानशमी समृद्ध्या पुरामयोध्येति पुरी परार्ध्या ॥[23]

अत्र महाकविकुमारदासः अयोध्यायाः समृद्धिः अति सुन्दररूपेण उत्प्रेक्षां कृतवान् ।

- **भ्रान्तिमानलङ्कार**

"साम्यादतस्मिंस्तद्वुद्धिर्भ्रान्तिमान् प्रतिभोत्थितः" [24]

साम्यात् सादृश्यवशात् अतस्मिन् तद्भिन्नवस्तुनि प्रतिभोत्थिता कविप्रौढोक्तिमात्रनिष्पन्ना तद्बुद्धिः तद्वस्तुप्रकारकं ज्ञानं – भ्रान्तिमानलङ्कारः । यथा –

सोपानरत्ननिर्भिन्नतमश्छेदेन दर्शिताः ।
यत्सरश्चक्रनामानो ग्लायन्ति न निशास्वपि ॥ [25]

मणेः प्रभया रात्रिः दिनमेव प्रतिभाति । अत्र भ्रमस्य चमत्कारपूर्णवर्णनया भ्रान्तिमानलङ्कारः भवति।

- **अहह्णुत्यलङ्कारः**

"प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्णुतिः" [26]

अर्थात् प्रकृतस्य उपमेयस्य प्रतिषेधं कृत्वा अन्यान्य उपमानस्य स्थापनमारोपकरणमपह्णुतिरित्यर्थः। यथा–

**अम्भोभिः सह पद्मरागसरणिर्ग्रासीकृता वारिधे**

रद्बान्ता पुनरिन्द्रगोपककुलव्याजेन मेघैरिह ।
येनैषामुदरेषु रत्नविततिर्वान्तावशिष्टा नव-
प्रोद्यद्धासुरवृत्रसूदनधनुर्व्याजेन संलक्ष्यते॥ [27]

अत्र उपमेयम् इन्द्रगोपकं निषेधं कृत्वा उपमानं पद्मरागमणेः सत्यस्वरूपं प्रतिपादयति । अतः अत्र अपह्णुत्यलङ्कारः ।

- **अनन्वयालङ्कार**

"उपमानोपमेयत्वमेकस्यैव त्वनन्वयः" [28]

अर्थात् यदा एकस्यैव वर्णनीयस्य वस्तुन उपमानत्वमुपमेयत्वं च भवति तदा अनन्वयो नाम अलङ्कारः स्यात् ।

तयोरयोबाणरयोपबृंहितस्फुटद्ध्वनिस्फोटितकर्णमाहवम् ।
गरुत्मदाशीविषपातदुःसहं निरीक्षितुं कोऽपि शशाक॥[29]

अत्र रामः रावणश्च उपमानोपमेयरूपे प्रतिभाति, अतः अनन्वयालङ्कारः ।

- **समासोक्त्यलङ्कार**

"समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः ।
व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः"॥ [30]

अर्थात् समानकार्यलिङ्गविशेषणान्यतमद्वारा प्रस्तुतपदार्थे अस्तुतपदार्थस्य व्यवहारारोपे समासोक्तिर्नाम अलङ्कारः स्यात् । यथा –

प्रवासमालम्ब्य घनागमश्रियः पयोधरस्पर्शवियोगनिःस्पृहः ।
महीधरः स्वं शिखरावसङ्गिनं त्यजत्यसौ मत्तशिखण्डिशेखरम्॥[31]

अत्र पयोधरादि श्लिष्टविशेषणं महीधरः अर्थात् पर्वतेन नायकः तथा धनागमः नायिकायाः अर्थः उपलब्धार्थमत्र समासोक्त्यलङ्कारः ।

- **अतिशयोक्त्यलङ्कार**

"सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते" [32]

उपमेयस्य निगरणपुरःसरम् उपमानेन सह तस्य अभेदज्ञानमध्यवसायः । तथा - भूतस्य अध्यवसायस्य सिद्धत्वे सति अतिशयोक्तिनामालङ्कारो भवतीत्यर्थः । यथा –

कृता वलौधेन तथाऽयताऽयता रजस्ततिः प्रावृतदिग्घना घना ।
यथा रवेरश्वपरम्पराऽपरा ययौ निमज्जत्खुरमालयाऽलया ॥ [33]

रजः कणराशेः वर्णनमत्र अतिशयरूपे वर्णनेन अतिशयोक्त्यलङ्कारः प्रतिभाति ।

- **तुल्ययोगितालङ्कार**

"पदार्थानां प्रस्तुतनामन्येषां वा यदा भवेत् ।
एकधर्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता"॥ [34]

प्रस्तुतानामप्रस्तुतानाञ्च पदार्थानां यत्र गुणक्रियारुपैकधर्मेण अभिसम्बन्धो भवेत् तत्र तुल्ययोगितानामकोऽलङ्कारो भवति ।

इमौ हरी संहृतरोषशङ्कितौ नितान्ततप्तौ तपनस्य दीप्तिभिः ।
तलं गजस्य स्रुतगण्डम्पदः फणातपत्रं फणिनश्च वाञ्छतः ॥ [35]

अत्र सिंहः तथा गजः प्रकृतः भवति, द्वयोःक्रिया एकैव भवति च समानधर्मयोगेन कारणत् अत्र तुल्ययोगितालङ्कारः ।

- **व्यतिरेकालङ्कार**

"आधिक्यमुपमेयस्योपमानान्न्यूनताऽथवा व्यतिरेकः" [36]

यत्र उपमानात् उपमेयस्य आधिक्यं येन केनापि प्रकारेण उत्कर्षः अथवा उपमानात् उपमेयस्य न्यूनता येन केनापि प्रकारेणापकर्षः, तत्र व्यतिरेको नाम अलङ्कारो भवति ।
निर्जिग्यतुबलिमृणालनालं सच्छिद्रवृत्तं यदि दीर्घसूत्रम् ।

सुश्लिलष्टसन्धी शुभविग्रहौ तो तन्त्याभुजौ किं किल तत्र चित्रम् ॥ [37]

अत्र कौशल्यायाः भुजरूपं उपमेयस्य मृणालनालरूपं उपमानस्य श्रेष्ठतायाः वर्णनाय अत्र व्यतिरेकालङ्कारो भवति ।

- **विशेषोक्त्यलङ्कार**

"सति हेतौ फलाभावो विशेषोक्तिः" [38]

अर्थात् हेतौ कारणे सत्यपि फलस्य कार्यस्य अभावो वर्ण्यते चेत् तर्हि विशेषोक्तिर्नामालङ्कारो भवेत् । यथा –

विन्यस्तपीनस्तनहेमकुम्भा
स्वेदाम्बुभिस्तद्धृदयोपकार्या ।
मनोभुवस्तत्प्रथमप्रवेशे सिक्तापि न तत्र रजः शशाम् ॥[39]

कामोद्वेगः रजस्य शमेन स्वेदाम्बुः विद्यमानः भवति, रजस्य शमः रूपकार्यस्य सिद्धत्व कारणात् विशेषोक्ति अलङ्कारः ।

- **स्वभावोक्त्यलङ्कारः -**

"स्वभावोक्तिर्दुरुहार्थस्वक्रियारुपवर्णनम्" [40]

वस्तुनो यथावत् स्वरूपस्फुटीकरणसमर्थमसाधारणधर्मवर्णनं स्वभावोक्तिरिति ।

द्विपास्ते दन्ताग्रस्थितकरमुदस्याननतटं
शनैराकर्षन्तो निगडकृतझङ्कारपरम् ।

समुत्तिष्ठन्त्येते करटतललीनालिवितती-

निरस्यन्तो हेलाविधुतपृथुकर्णाग्रपवनैः ॥[41]

अत्र गजस्य क्रिया – शनैः शनैः शृंखलायाः कर्षणं, स्वयं गण्डस्थस्योपरि स्थितमक्षिकाणां समूहस्य वाय्वादि चित्रणं स्वभावोक्त्यलङ्कारो भवति।

- **पर्यायोक्त्यलङ्कार**

"पर्यायोक्तं यदा भङ्ग्या गम्यमेवाभिधीयते" [42]

यत्र काव्ये वाच्यवाचकत्वेन विना वाच्यवाचकभावभिन्नेन व्यञ्जनारूपव्यापारेण यद्वचः अर्थात् वाच्यार्थस्यैव यत्प्रतिपादनं तत्पर्यायोक्तम् इति।

मदं नवैश्वर्यबलेन लम्भितं विसृज्य पूर्वः समयो विमृश्यताम्।
जगज्जिघत्सातुरकण्ठपद्धतिर्न वालिनैवाहिततृप्तिरन्तकः ॥[43]

- **काव्यलिङ्गालङ्कार**

"हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते" [44]

हेतोः कश्चिदर्थ प्रति कारणस्य वाक्यपदार्थत्वे व्यञ्जनया सम्पूर्णवाक्यवोध्यत्वे पदवोध्यत्वे वा काव्यलिङ्गं नामालङ्कारो भवेत्।

नाकाङ्गनारत्नमरीचिजालध्वस्तान्धकारप्रकरस्य यस्य।
निकुञ्जपद्माकरपद्मषण्डैर्विदन्ति रात्रिन्दिवसंविभागम् ॥ [45]

अत्र रात्रिदिवसयोः विभाजने पुष्पस्य प्रस्फुटितंकारणेन काव्यलिङ्गालङ्कारो भवति।
एतदतिरिक्तं दृष्टान्तः, अर्थान्तरन्यासः, सन्देहः, विरोधाभासः, सहोक्तिः, अर्थापत्तिः इत्यादयः अलङ्काराणां प्रयोगाः "जानकीहरणम्" इति महाकाव्ये प्राप्यन्ते।

संदर्भ सूची

1. काव्यालङ्कारसूत्रवृत्तिः
2. काव्यादर्शः 2.1
3. चन्द्रालोकम् 5.1
4. नाट्यशास्त्रम् 17.43
5. काव्यालङ्कारः 1.13
6. काव्यादर्शः 2.1
7. काव्यालङ्कारः 3.1.2
8. तत्रैव 3.1.2
9. तत्रैव 3.1.2
10. वक्रोक्तिजीवितम् 1.6
11. ध्वन्यालोकः 2.19
12. साहित्यदर्पणम् 10.3
13. जानकीहरणम् 1.1
14. साहित्यदर्पणम् 10ण8
15. जानकीहरणम् 14ध47
16. साहित्यदर्पणम् 10ण11
17. जानकीहरणम् 1ध15
18. साहित्यदर्पणम् 10ण14
19. जानकीहरणम् 2ध22
20. साहित्यदर्पणम् 10.28
21. जानकीहरणम् 1ध25
22. साहित्यदर्पणम् 10ण40
23. जानकीहरणम् 1ध1
24. साहित्यदर्पणम् 10ण36
25. जानकीहरणम् 6ध29
26. साहित्यदर्पणम् 10.36
27. जानकीहरणम् 11ध96
28. साहित्यदर्पणम् 10ण26
29. जानकीहरणम् 19ध26
30. साहित्यदर्पणम् 10.56
31. जानकीहरणम् 12ध13
32. साहित्यदर्पणम् 10.56
33. जानकीहरणम् 17ध31
34. साहित्यदर्पणम् 10.47
35. जानकीहरणम् 5ध24
36. साहित्यदर्पणम् 10ण52
37. जानकीहरणम् 5ध24
38. साहित्यदर्पणम् 10.67
39. जानकीहरणम् 7ध4
40. साहित्यदर्पणम् 10.92
41. जानकीहरणम् 3ध79
42. साहित्यदर्पणम् 10.60
43. जानकीहरणम् 12ध36
44. साहित्यदर्पणम् 10.62
45. जानकीहरणम् 1ध50